International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2024; 1(4): 65-67
© 2024 IJMH
www.themultijournal.com
Received: 17-10-2024
Accepted: 25-10-2024
Publish : 28-10-2024

**डा.नागराजभट्टः**
सहाचार्यः, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**डा.नागराजभट्टः**
सहाचार्यः, अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# मायायाः प्रपञ्चोपादानत्वम्

**डा.नागराजभट्टः**

**शोधलेखसारः**

अनाद्यविद्या मायाशब्दिता त्रिगुणात्मिका भूतप्रकृतिः परमेश्वरोपाधिः जगदुपादानतया वेदान्तेषु प्रतीयते। "मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्" इत्यादिश्रुतिभिः मायायाः भूतभौतिक-प्रपञ्चोपादानकारणत्वं प्रसाधितमेव। मायायाः जगदुपादानत्वविषये प्राचीनैर्वेदान्ताचार्यैः संसाधितानि मतानि प्राधान्येन त्रिषु पक्षेषु संग्रहीतुं शक्यन्ते। ते ब्रह्ममायोभयोपादानत्वपक्षः, ब्रह्ममात्रो-पादानत्वपक्षः, मायामात्रोपादानत्वपक्षश्चेति भवन्ति। ब्रह्ममात्रोपादानत्वपक्षेऽपि संक्षेपशारीरक-कारप्रतिपादितः मायायाः द्वारकारणत्वपक्षः, भामतीकारप्रतिपादितः मायायाः सहकारिकारणत्वपक्षश्च प्राचीनानां ग्रन्थेषु व्याख्यातः। इत्थं शोधलेखेऽस्मिन् मायायाः प्रपञ्चोपादानत्वविषये प्राचीनानामा-चार्याणां मतं संग्रहेण सिद्धान्तलेशसंग्रहप्रदर्शितानुसारं समीक्ष्यते।

**कूटशब्दाः –** द्वारकारणं, सहकारिकारणं, माया, उपादानकारणम्, विवर्तः, परिणामः

**भूमिका**

महासुषुप्तिशब्दितां परमेश्वराश्रितां त्रिगुणात्मिकां बीजशक्तिभूतां मायामुपेत्य सर्वज्ञसर्वशक्तस्य परमात्मनः जगदुपादानत्वं व्यवस्थाप्यते। नित्यविशुद्धस्वभावस्य कूटस्थचिन्मात्रस्वरूपस्य ब्रह्मणः मायोपाधिसम्बन्धं विना भूतभौतिकप्रकृतित्वोपपादनं नैव युज्यते। परमात्मनः आत्मशक्तिः माया इति सा संस्तूयते। परमेश्वराश्रितायाः तस्याः कार्यप्रपञ्चजनिहेतुत्वं वेदान्तशास्त्रविदो मन्यन्ते। तत्र मुख्य-सिद्धान्तस्तु ब्रह्ममाययोरुभयोः उपादानत्वमस्तु इत्येव भवति। किन्तु मायायाः जगदुपादानकारणत्वं संक्षेपशारीरककाराः सर्वज्ञात्ममुनिवर्याः, भामतीकाराः वाचस्पतिमिश्राश्च नानुमन्यन्ते। अथात्र सिद्धा-न्तलेशसंग्रहदिशा मायायाः प्रपञ्चोपादानकारणत्वं संक्षेपेण विचार्यते।

**१.ब्रह्ममायोभयोपादानत्वपक्षः**

ब्रह्मणः निरवयवत्वेन परिणामासम्भवात् मृदादेरिव तत्र परिणामोपादानत्वं नैव युज्यते। कार्ये च जगति सर्वत्र सच्चिदानन्दादयः ब्रह्मधर्माः प्रतीयन्ते। जाड्यादयः त्रिगुणात्मिकायाः मायायाः धर्मा अपि तत्र नियमेन अनुभूयन्ते। अतः उभयधर्मानुवृत्तिनिर्वाहाय तदुभयोपादानबोधकश्रुतिवाक्यार्थोपपादनाय च उभयोः ब्रह्ममाययोः तदुपादानकारणत्वं पदार्थतत्त्वनिर्णयकाराः अङ्गीकुर्वन्ति। तदुक्तं

**"अहेतुत्वादमायस्य मायाशबलतेष्यते। साऽप्युपादानमेवेति तत्त्वनिर्णयकृन्मतम्"**[1] इति।

अत्रायं विशेषः यत् कार्येषु सत्ताजाड्यरूपोभयधर्मानुगमात् ब्रह्म विवर्तमानतया उपादानम्। माया च परिणामितया उपादानमिति। समसत्ताककार्यापत्तिरेव परिणामः यथा क्षीरं दध्याकारेण परिणमते इत्युच्यते। विषमसत्ताककार्यापत्तिः विवर्तः यथा शुक्त्यवच्छिन्नं चैतन्यं रजताकारेण विवर्तते इति। इत्थं युक्त्या ब्रह्ममाययोरुभयोः जगदुपादानत्वं समर्थितम्। तदर्थे श्रुतिरपि प्रमाणं यथा **"मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्"**[2] इति। ब्रह्मणि विवर्तोपादानत्वे किं पारिभाषिकमेव उपादानत्वमिष्यते इत्याकाङ्क्षायामुच्यते, विवर्ताधिष्ठाने न पारिभाषिकमुपादानत्वम् इति। मृदादिषु प्रसिद्धं घटाद्यु-पादानत्वलक्षणं विवर्तोपादानेऽपि सम्भवात् । तच्च स्वात्मनि कार्यजनिहेतुत्वमेव उपादानत्वम्। कार्याधारत्वे सति कार्यजनिहेतुत्वम् इति तदर्थः। इदं च परिणामविवर्तोपादानोभयतुल्यमिति बोध्यम्।

**"स्वाभिन्नकार्यजनकत्वम् उपादानत्वम्"**[3] इत्यपि उपादानलक्षणं भवितुमर्हति। इदमपि विवर्तपरिणामोपादानद्वयसाधारणम्। "सन् घटः", "जडो घटः" इत्यादिपरीक्षितप्रतीतिबलात् कार्यस्य जगतः सद्रूपब्रह्मणा जडमायया सह अभेदः प्रतीयते। अतः सद्रूपब्रह्मणः जडमायायाश्च स्वाभिन्नकार्यजनिहेतुत्वं गम्यते। **"सदेव सोम्य इदमग्र आसीत्", "तदेतज्जडं मोहात्मकम्" इत्यादिश्रुतिः**[4] ब्रह्मणः सद्रूपत्वं, मायायाश्च जडरूपत्वं बोधयति। इत्थं स्वाभिन्नकार्यजनकत्वेन रूपेण ब्रह्ममाययोरुभयोः जगदुपादानत्वं सुनिरूपितं भवति।

**२. ब्रह्ममात्रोपादानत्वपक्षः**

**२.१. मायायाः द्वारकारणत्वपक्षः – (संक्षेपशारीरककारमतम्)**

ब्रह्मैव जगदुपादानं माया च द्वारकारणमात्रमिति संक्षेपशारीरककृन्मतम्। तन्मतं प्रोक्तं यथा **"ब्रह्ममात्रमुपादानं माया तु द्वारकारणम्। मृच्छ्लक्ष्णतावत् संक्षेपशारीरककृतां नये"**[5] इति। कूटस्थाविकारि ब्रह्म न स्वतः कारणं किन्तु मायाद्वारीकृत्य जगद्रूपेण विवर्तते। मायायाः अनुपादानत्वे जगति जाड्यादिधर्मोपलब्धिः कथम्? इत्याक्षेपः स्यात्। तत्रेदं समाधानम् – अकारणस्यापि कार्येऽनुगमदर्शनात्, मायायाः उपादानत्वेन एव जाड्यादिधर्मस्य जगति अनुगमः इति न वक्तव्यम्। घटे अनुभूयमानं मृत्तिकागतं श्लक्ष्णत्वादि न घटोपादानम्। एवमेव प्रपञ्चोनुपादानभूताऽपि माया कार्यानुगतद्वारकारणभूता इति स्थितिः। अतः ब्रह्ममायोभयोपादानत्वं व्यर्थमिति संक्षेपशारीरककृदो मन्यन्ते। कार्ये सर्वत्र अनुपादानभूतायाः द्वारकारणरूपायाः मायायाः जाड्यादिधर्माः अनुवर्तन्ते एव। मायां विनैव ब्रह्मणः जगत्कारणत्वमपि न वक्तव्यम्। यतः ब्रह्मणः प्रपञ्चाकारेण परिणामित्वमेव सम्भवेत्। परिणामवादाभ्युपगमेन ब्रह्मण्यपि जन्मादिभावविकाराः स्युः। **"न जायते म्रियते वा"**[6] इत्यादिश्रुत्युक्तकूटस्थस्वभावविरोधश्च स्यात्। अतः मायाद्वारकमेव ब्रह्मणः जगदुपादानत्वमिति स्वीकारेण माया न व्यर्था इत्यपि प्रसाधितं भवति। पूर्वोक्तप्रकारेण मृत्तिकायाः घटोत्पत्तौ उपादानत्वेऽपि तद्गतश्लक्ष्णत्वादिः द्वारकारणमेव न तु उपादानकारणं भवति। श्लक्ष्णत्वादिसंस्काररहितायाः मृदः घटोपादानत्वं नोपपद्यते। एवमेव कूटस्थचिद्रूपे ब्रह्मणि कार्योपादानत्वं सम्पादयन्ती माया द्वारकारणमिति फलितार्थः।

"मायायाः द्वारकारणत्वम्" नाम किम्? इति चिन्त्यम्। कार्यानुगतरूपेण सहकारित्वमेव द्वारकारणत्वम्। ब्रह्मणि समारोपिता माया, तस्मिन् ब्रह्मणि प्रपञ्चोपादानत्वं घटयन्ती द्वारभूता भवति इत्युच्यते। तत्रापि "मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्" इत्यादिना ब्रह्मणि प्रपञ्चोपादानत्वसम्पादनद्वारा एव श्रुतौ मायाया प्रकृतित्वं प्रोक्तम्। ब्रह्म च कूटस्थचिन्मात्रस्वरूपं विवर्तमानतया एव उपादानं न तु परिणामितया इति बोध्यम्। ब्रह्मणि प्रपञ्चोपादानत्वसम्पादकत्वेन एव मायायाः द्वारकारणत्वं न तु स्वतः तत्प्रकृतित्वमिति अभिप्रायेणैव सा परमेश्वराश्रिता बीजशक्तिः इति श्रूयते। यथा **"परास्य शक्तिः विविधैव श्रूयते"**[7] इति। पारमेश्वशक्तित्वेन तस्याः स्वतः जगदुपादानत्वासम्भवः इति भावः।

तर्हि जगतः परिणामोपादानं किमिति चेत् तत्तस्य जगतः नापेक्षितमिति संक्षेपशारीरककाराणां सिद्धान्तः। न च जडमायायाः जगत्प्रकृतित्वाभावे कार्यस्य जगतः जाड्यादिः न स्यादिति शङ्क्यम्। यतः अनुपादानमपि द्वारकारणं कार्ये अनुप्रविशति इति दृश्यते। अतश्च ब्रह्मणि विवर्तोपादानत्वं सङ्घटयन्ती एव माया द्वारकारणभावं भजते। तस्मात् अनुपादानभूता अपि माया कार्यानुगतद्वारकारणभूता इति सिद्धम्।

**२.२. मायायाः सहकारिकारणत्वपक्षः – (भामतीकारमतम्)**

जगति अनुगतं जाड्यादिकं न कारणगुणः किन्तु कार्यस्यैव जगतः स्वाभाविकम्। कार्यस्य विशेषः गुणः। अतः जाड्यादिगुणोपपादनाय मायायाः उपादानत्वं कार्यानुगतद्वारकारणत्वं वा न कल्पनीयम् इति वाचस्पतिमिश्राणाम् आशयः। जीवाश्रितमायाविषयीकृतं ब्रह्म स्वत एव (द्वारकारणं विना) जाड्याश्रयप्रपञ्चाकारेण विवर्तमानतया उपादानमिति माया सहकारिमात्रं न कार्यानुगतद्वारकारणम् इति वाचस्पतिमिश्राः प्राहुः। भामतीमतानुसारं माया जीवाश्रिता उपहितब्रह्मविषयिणी भवति। जीवश्च अविद्यावच्छिन्नचिदात्मा। प्रतिजीवम् अविद्यायाः नानात्वात्, बन्धमोक्षव्यवस्था अपि सङ्गच्छते। यस्य जीवस्य ज्ञानेन अविद्यायाः बाधः तन्मात्रस्य मुक्तिः, अन्येषां च अविद्याबन्धानुवृत्तिः इति उपपद्यत एव मायायाः जीवाश्रितत्वम्। किन्तु संक्षेपशारीरकमते विवरणमते च शुद्धब्रह्मैव मायायाः आश्रयः विषयश्च। तदुक्तं – **"आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला"**[8] इति। तत्र जीवाश्रितमायाविषयीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्तते इत्युच्यते। तदुक्तं- "मूलकारणमेव आऽन्त्यात् कार्यात् तेन तेन कार्याकारेण नटवत् **सर्वव्यवहारास्पदत्वं प्रतिपद्यते"**[9] इति। मायायाः सहकारिकारणत्वमात्रं स्वीक्रियते। कार्याननुगतत्वे सति उपकारकत्वं सहकारिकारणत्वम्। जाड्यादिधर्माः कार्यस्यैव विशेषगुणाः भवितुमर्हन्ति। कार्यस्य जाड्यादिधर्मनिर्वाहाय मायायां कार्यानुगतत्वेन उपादानत्वं द्वारकारणत्वं वा वक्तव्यमिति आग्रहो न युक्त इति तन्मतम्। अतः जाड्यादिधर्माः कार्यप्रपञ्चस्यैव विशेषः स्वभाव इति अङ्गीक्रियते। इत्थं ब्रह्मणः विवर्तमानतया प्रपञ्चोपादानत्वं मायायाश्च कार्याननुगततया सहकारिकारणत्वमेव इति वाचस्पतेर्मतं प्रसाधितम्।

**३.मायामात्रोपादानत्वपक्षः**

सत्त्वरजस्तमोगुणान्वितस्य भूतभौतिकप्रपञ्चस्य त्रिगुणात्मिका माया एव उपादानमिति सिद्धान्तमुक्तावलीकाराः प्रकाशानन्दयतिवर्याः प्राहुः। मायैव प्रपञ्चोपादानं न ब्रह्मेति तन्मतम्। सिद्धान्तमुक्तावलीकृन्मतं व्याख्यातं यथा -

"अपूर्वानपरं ब्रह्म नोपादानं जगत्स्थितेः। माया तु **मुख्योपादानमिति मुक्तावलीकृतः"**[10] इति। जाड्यसावयवत्वानित्यत्वादयो धर्माः प्रपञ्चरूपे कार्ये अनुवर्तमानाः तदनुरूपमेव उपादानकारणं

गमयन्ति। उपादानकारणगतधर्माणामेव कार्येषु अनुवृत्तिदर्शनात्। ब्रह्म च सच्चिदानन्दस्वरूपं विशुद्धं निरवयवं कार्याकारेण परिणामितया उपादानकारणमिति न युक्तम्। सावयवस्यैव त्रिगुणात्मकस्य अज्ञानस्य कार्याकारेण परिणामः उपपद्यते।

ब्रह्म न कार्यं, नापि कारणमिति श्रूयते । तद्यथा – "तदेतद् ब्रह्म अपूर्वमनपरमबाह्यम्","न तस्य कार्यं करणं च विद्यते" इति। तत् ब्रह्म एतत् बुद्ध्यादिसाक्षिस्वरूपं पूर्वं- कारणं न विद्यते यस्य तदपूर्वम्, अनपरम् अपरं कार्यं न विद्यते यस्य तदनपरम् इति तदर्थः बोद्धव्यः। कूटस्थसाक्षिस्वरूपस्य ब्रह्मणः कार्यकारणभावनिषेधश्रुतेः परमेश्वराश्रितायाः मायाया एव जगदुपादानत्वं वक्तव्यम्।

ब्रह्मणः उपादानत्वमपि लोकप्रसिद्धं शास्त्रप्रसिद्धं वा भवितुमर्हति तस्य अद्वितीयकूटस्थचैतन्यमात्रस्वरूपत्वात्। तस्य च परमाणूनामिव द्व्यणुकत्र्यणुकादिक्रमेण प्रपञ्चारम्भकत्वं स्वीकर्तुमुचितम् आरम्भवादस्यैव अनङ्गीकारात्। क्षीरस्य दध्याकारपरिणामवत् त्रिगुणात्मिका मूलप्रकृतिः स्थूलसूक्ष्मप्रपञ्चाकारेण परिणमते इति सांख्याः मन्वते। नापि मूलप्रकृतेरिव प्रपञ्चाकारेण ब्रह्मणः परिणामः निरवयवनिर्विकारस्वरूपत्वात्तस्य। अतः **अत्यन्तमेव शास्त्राप्रसिद्धं विवर्तवादं**[11] पुरस्कृत्य ब्रह्मणः विवर्तमानतया प्रपञ्चोपादानत्वम् उपपाद्यते। तच्च अयुक्तं लोकवेदाप्रसिद्धत्वात्। अतश्च मायाया एव जगदुपादानत्वं वक्तव्यमिति सिद्धान्तमुक्तावलीकाराः मन्यन्ते।

**"यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति"**[12] इत्याद्यनेकश्रुतिवाक्यैः ब्रह्मणः एव जगदुपादानत्वं प्रतीयते। उपादानकारणगुणाः कार्ये सङ्क्रामन्ति। अत एव आनन्दादयः ब्रह्मस्वरूपधर्माः जगति अनुभूयन्ते। तस्मात् श्रुतियुक्तिभिः जगतः उपादानं ब्रह्म इत्येव वक्तव्यमिति ब्रह्मोपादानकारणत्ववादिनः प्रत्यवतिष्ठन्ते।

अत्रेदं समाधानं वक्तव्यम्। जगदुपादानप्रतिपादकश्रुतेः गौणत्वमेव इति। प्रपञ्चोपादानमायाधिष्ठानत्वेन ब्रह्मणि औपचारिकम् उपादानकारणत्वं प्रदर्श्यते ताभिः श्रुतिभिः। तदुक्तं "ब्रह्माज्ञानात् जगज्जन्म ब्रह्मणोऽकारणत्वतः। अधिष्ठानत्वमात्रेण कारणं ब्रह्म गीयते॥ दृश्यत्वाद्यनुमानसिद्धानिर्वचनीयस्य जगतः अनाद्यनिर्वचनीया अविद्यैव कारणम्, न ब्रह्म, तस्य कूटस्थस्य कार्यकारणविलक्षणत्वात्, "तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्" "अयमात्मा ब्रह्म सर्वानुभूः" इति श्रुतेः। कथं तर्हि ब्रह्मणो जगत्कारणत्वं श्रुतौ प्रसिद्धम्? जगत्कारणाधिष्ठानत्वेन कारणत्वोपचारात्। **ब्रह्मकारणश्रुतेरन्यार्थत्वाच्च"**[13] इति। दृश्यत्वादिहेतुकानुमानेन मिथ्याभूतप्रपञ्चस्य अनाद्यनिर्वचनीया महामोहकरी माया एव उपादानम्। नेदं जगत् ब्रह्मप्रकृतिकं कार्येण विलक्षणत्वात् कूटस्थचिन्मात्रब्रह्मणः। ब्रह्मोपादनत्वबोधकश्रुतेः अन्यार्थप्रतिपादनेनापि व्यवस्था उपपद्यते। जगदुपादानमायाधिष्ठानतया ब्रह्मणि उपादानत्वोक्तिः गौणी इति सिद्धान्तमुक्तावलीकाराणां मतम्। अतश्च त्रिगुणात्मिका अनाद्यनिर्वचनीया माया एव प्रपञ्चोपादानम् इति सिद्धम्।

**उपसंहारः**

सत्त्वरजस्तमोगुणान्वितस्य जगतः परिणामोपादानं माया इति वेदान्तसिद्धान्तः संक्षेपेण निरूपितः। मायया एव बुध्यादेः प्रपञ्चस्य उत्पत्तिरिति सुरेश्वराचार्यैः भणितम्। तद्यथा **"बुध्यादिष्वपि सूक्ष्मेषु यत्सूक्ष्मतममुच्यते। बुध्यादिकारणं नित्यमात्माविद्या इति भण्यते"**[14] इति। कूटस्थचिन्मात्रब्रह्मणः अनाद्यविद्यासम्बन्धं विना प्रपञ्चोपादानत्वमपि न भवति। "अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्। आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्" इति संप्रदायोक्तिमनुसृत्य सत्ताजाड्यादिधर्मानुवृत्तिनिर्वाहाय ब्रह्ममायोभयोपादानवादः सर्वसम्मत इति शिवम्।

**परिशीलितग्रन्थसूची**


१. सिद्धान्तलेशसंग्रहः (प्रथमो भागः) - संपादकः- प्रो.पारसनाथद्विवेदी, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, २००५
२. ब्रह्मसूत्रशाङ्करभाष्यम्– सम्पादकः आचार्यजगदीशशास्त्री, मोतीलालबनारसीदास वाराणसी, २००५
३. संक्षेपशारीरकम् – सम्पादकः स्वामी दिव्यानन्दगिरिः, राष्ट्रीय संस्कृत संस्थान नई दिल्ली,१९९९
४. https://advaitasharada.sringeri.net/


**पाद टिप्पणी –**

1. वेदान्तसिद्धान्तसूक्तिमञ्जरी- २४
2. श्वे.उ.४.१०
3. सिद्धान्तलेशसंग्रहः- पृ.सं.१३२
4. छा.उ.६.२.१, नृ.उ.९.२
5. वेदान्तसिद्धान्तसूक्तिमञ्जरी- २५
6. कठ.उ.१.२.१८
7. श्वे.उ.६.७
8. संक्षेपशारीरकम् – १.३.१९
9. ब्र.सू.२.१.१४
10. वेदान्तसिद्धान्तसूक्तिमञ्जरी- २७
11. विषमसत्ताककार्यापत्तिः विवर्तः
12. तैत्तिरियोपनिषत् – ३.१.१
13. सिद्धान्तमुक्तावली- ३८
14. बृ.वार्तिकम् – ४.३.३४८